॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय १३

अथ लोकेश्वरोत्सृष्टा तत्र कालेन केन चित् ।
निद्रा समभवत्तीव्रा कुम्भकर्णस्य रूपिणी ॥ १॥

ततो भ्रातरमासीनं कुम्भकर्णोऽब्रवीद्वचः ।
निद्रा मां बाधते राजन्कारयस्व ममालयम् ॥ २॥

विनियुक्तास्ततो राज्ञा शिल्पिनो विश्वकर्मवत् ।
अकुर्वन्कुम्भकर्णस्य कैलाससममालयम् ॥ ३॥

विस्तीर्णं योजनं शुभ्रं ततो द्विगुणमायतम् ।
दर्शनीयं निराबाधं कुम्भकर्णस्य चक्रिरे ॥ ४॥

स्फाटिकैः काञ्चनैश्चित्रैः स्तम्भैः सर्वत्र शोभितम् ।
वैदूर्यकृतशोभं च किङ्किणीजालकं तथा ॥ ५॥

दन्ततोरणविन्यस्तं वज्रस्फटिकवेदिकम् ।
सर्वर्तुसुखदं नित्यं मेरोः पुण्यां गुहाम् इव ॥ ६॥

तत्र निद्रां समाविष्टः कुम्भकर्णो निशाचरः ।
बहून्यब्दसहस्राणि शयानो नावबुध्यते ॥ ७॥

निद्राभिभूते तु तदा कुम्भकर्णे दशाननः ।
देवर्षियक्षगन्धर्वान्बाधते स्म स नित्यशः ॥ ८॥

उद्यानानि विचित्राणि नन्दनादीनि यानि च ।
तानि गत्वा सुसङ्क्रुद्धो भिनत्ति स्म दशाननः ॥ ९॥

नदीं गज इव क्रीडन्वृक्षान्वायुरिव क्षिपन् ।
नगान्वज्र इव सृष्टो विध्वंसयति नित्यशः ॥ १०॥

तथा वृत्तं तु विज्ञाय दशग्रीवं धनेश्वरः ।
कुलानुरूपं धर्मज्ञ वृत्तं संस्मृत्य चात्मनः ॥ ११॥

सौभ्रात्रदर्शनार्थं तु दूतं वैश्वरणस्तदा ।
लङ्कां सम्प्रेषयामास दशग्रीवस्य वै हितम् ॥ १२॥

स गत्वा नगरीं लङ्कामाससाद विभीषणम् ।
मानितस्तेन धर्मेण पृष्टश्चागमनं प्रति ॥ १३॥

पृष्ट्वा च कुशलं राज्ञो ज्ञातीनपि च बान्धवान् ।
सभायां दर्शयामास तमासीनं दशाननम् ॥ १४॥

स दृष्ट्वा तत्र राजानं दीप्यमानं स्वतेजसा ।
जयेन चाभिसम्पूज्य तूष्णीमासीन्मुहूर्तकम् ॥ १५॥

तस्योपनीते पर्यङ्के वरास्तरणसंवृते ।
उपविश्य दशग्रीवं दूतो वाक्यमथाब्रवीत् ॥ १६॥

राजन्वदामि ते सर्वं भ्राता तव यदब्रवीत् ।
उभयोः सदृशं सौम्य वृत्तस्य च कुलस्य च ॥ १७॥

साधु पर्याप्तमेतावत्कृतश्चारित्रसङ्ग्रहः ।
साधु धर्मे व्यवस्थानं क्रियतां यदि शक्यते ॥ १८॥

दृष्टं मे नन्दनं भग्नमृषयो निहताः श्रुताः ।
देवानां तु समुद्योगस्त्वत्तो राजञ्श्रुतश् च मे ॥ १९॥

निराकृतश्च बहुशस्त्वयाहं राक्षसाधिप ।
अपराद्धा हि बाल्याच्च रक्षणीयाः स्वबान्धवाः ॥ २०॥

अहं तु हिमवत्पृष्ठं गतो धर्ममुपासितुम् ।
रौद्रं व्रतं समास्थाय नियतो नियतेन्द्रियः ॥ २१॥

तत्र देवो मया दृष्टः सह देव्योमया प्रभुः ।
सव्यं चक्षुर्मया चैव तत्र देव्यां निपातितम् ॥ २२॥

का न्वियं स्यादिति शुभा न खल्वन्येन हेतुना ।
रूपं ह्यनुपमं कृत्वा तत्र क्रीडति पार्वती ॥ २३॥

ततो देव्याः प्रभावेन दग्धं सव्यं ममेक्षणम् ।
रेणुध्वस्तमिव ज्योतिः पिङ्गलत्वमुपागतम् ॥ २४॥

ततोऽहमन्यद्विस्तीर्णं गत्वा तस्य गिरेस्तटम् ।
पूर्णं वर्षशतान्यष्टौ समवाप महाव्रतम् ॥ २५॥

समाप्ते नियमे तस्मिंस्तत्र देवो महेश्वरः ।

प्रीतः प्रीतेन मनसा प्राह वाक्यमिदं प्रभुः ॥ २६ ॥

प्रीतोऽस्मि तव धर्मज्ञ तपसानेन सुव्रत ।
मया चैतद्धृतं चीर्णं त्वया चैव धनाधिप ॥ २७ ॥

तृतीयः पुरुषो नास्ति यश्चरेद्धृतमीदृशम् ।
व्रतं सुदुश्चरं ह्येतन्मयैवोत्पादितं पुरा ॥ २८ ॥

तत्सखित्वं मया सार्धं रोचयस्व धनेश्वर ।
तपसा निर्जितत्वाद्धि सखा भव ममानघ ॥ २९ ॥

देव्या दग्धं प्रभावेन यच्च साव्यं तवेक्षणम् ।
एकाक्षि पिङ्गलेत्येव नाम स्थास्यति शाश्वतम् ॥ ३० ॥

एवं तेन सखित्वं च प्राप्यानुज्ञां च शङ्करात् ।
आगम्य च श्रुतोऽयं मे तव पापविनिश्चयः ॥ ३१ ॥

तदधर्मिष्ठसंयोगान्निवर्त कुलदूषण ।
चिन्त्यते हि वधोपायः सर्षिसङ्घैः सुरैस्तव ॥ ३२ ॥

एवमुक्तो दशग्रीवः क्रुद्धः संरक्तलोचनः ।
हस्तान्दन्तांश सम्पीड्य वाक्यमेतदुवाच ह ॥ ३३ ॥

विज्ञातं ते मया दूत वाक्यं यत्त्वं प्रभाषसे ।
नैव त्वमसि नैवासौ भ्रात्रा येनासि प्रेषितः ॥ ३४ ॥

हितं न स ममैतद्धि ब्रवीति धनरक्षकः ।
महेश्वरसखित्वं तु मूढ श्रावयसे किल ॥ ३५ ॥

न हन्तव्यो गुरुर्ज्येष्ठो ममायमिति मन्यते ।
तस्य त्विदानीं श्रुत्वा मे वाक्यमेषा कृता मतिः ॥ ३६ ॥

त्रींल्लोकानपि जेष्यामि बाहुवीर्यमुपाश्रितः ।
एतन्मुहूर्तमेषोऽहं तस्यैकस्य कृते च वै ।
चतुरो लोकपालांस्तान्नयिष्यामि यमक्षयम् ॥ ३७ ॥

एवमुक्त्वा तु लङ्केशो दूतं खड्गेन जघ्निवान् ।
ददौ भक्षयितुं ह्येनं राक्षसानां दुरात्मनाम् ॥ ३८ ॥

ततः कृतस्वस्त्ययनो रथमारुह्य रावणः ।
त्रैलोक्यविजयाकाङ्क्षी ययौ तत्र धनेश्वरः ॥ ३९ ॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com